अनिष्टचिन्तके द्रोग्धरि च । "उपकर्त्त्रारिणा सन्धिर्न मित्रेणापकारिणेति" माघः स्ववीर्य्येणैव तान् मिथ्याज्ञानवानपकारिणः" इति मनुः ।

**अपकृत** त्रि० अप+कृ-कर्म्मणि क्त । यस्यानिष्टं कृतं तस्मिन् कृतद्रोहे "किं मयापकृतं तस्येति" । भावे क्त । अपकारे न० । "मित्रस्य चैवापकृते द्विविधोविग्रहः स्मृत" इति मनुः । [द्रोहे च ।

**अपकृति** स्त्री अप+कृ-भावे क्तिन् । अपकारे, अनिष्टचिन्तने,

**अपकृत्य** न० अपकृष्टं कृत्यम् प्रा०स० । अपकृष्टकर्म्मणि । अप+कृ-भावे क्यप् । अपकारे न० । भावे स्त्रियां क्यप् । अपकृत्या अपकारे स्त्री ।

**अपकृष्ट** त्रि० अप+कृष-क्त । अधमे, हीने, स्वकालात् पूर्व्वकाले कृते, परस्थलादन्वयार्थं पूर्बस्थले आकृष्टे, आकृष्टमाले च "स्वोच्चापकृष्टा भगणैः प्राङ्मुखं यान्ति मङ्गला" इति सूर्य्यसिद्धान्तः ।

**अपक्ति** स्त्री न पक्तिः अभावार्थे न०त० । पाकाभावे ।

**अपक्रम** पु० अप+क्रम-भावे घञ् । अपयाने । अपक्रमाद्दुर्हैवैषामेतद्भियाञ्चकार" शत०ब्रा० ४,३,३,११ । अपक्रम्यते यस्मात् अपादाने घञ् । अपयानावधिस्थाने "विक्षिपत्येव विक्षेपं चन्द्रादीनामपक्रमादिति" सू०सि० । "अपक्रमात् क्रान्तिवृत्तस्यसप्तग्रहभोगस्थानादिति" रङ्गनाथः । अपगतः क्रमःपरिपाटी यस्मात् प्रा०स० । क्रमविहीने अक्रमे त्रि० वा उत्तरपदलोपाभावे अपगतक्रमोऽप्युक्तार्थे त्रि० । क्रमस्यालयः अव्ययी० । क्रमालये अव्य० । क्वि वेट्कत्वात् वा वृद्धिः । अपक्रामोऽप्युक्तार्थे । "यस्यस्याभिक्रान्त्याऽपक्रामाय" इति ऐ० ब्रा० ।

**अपक्रमण** त्रि० अप+क्रम-भावे ल्युट् । अपयाने पलायने च । "अपक्रमणमेवास्य सर्वकामैरहं वृणे" इति रामा० । "पुरस्ताद्वापक्रमणमस्त्वैवान्विच्छतेति" शत०ब्रा० ।

**अपक्रमिन्** त्रि० अप+क्रम-कर्त्तरि णिनि वेट्कामन्तत्वात् वा वृद्धिः । अपयानकर्त्तरि "तानेवैतदनपक्रमिणोऽकुरुत" शत० ब्रा० वृद्धौ अपक्रामीत्यपि स्त्रियां ङीप् ।

**अपक्रिया** स्त्री अप+कृ-भावे स्त्रियां श । द्रोहे, अपकारे च । चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रियेति" माघः । "जन्मवेषतपसां विरोधिनो मा कृथाः पुनरमूमपक्रियामिति" किरा० ।

**अपक्रोश** पु० अप+क्रुश-घञ् । निन्दने । उपक्रोशोऽप्यत्र । भावे ल्युट् । अपक्रोशनमप्यत्र न० ।

**अपक्व** त्रि० न पक्वः । अपरिणते अपक्वयोगी अपरिणतयोगी यथा योगाभ्यास उचितः तथाभ्यासशून्यः इत्यर्थः । आमे तण्डुलफलादौ च । "अपक्वेन वर्त्तितव्यं फलमूलादिनापि वेति" स्मृतिः ।

**अपक्ष** त्रि० नास्ति पक्षो गरुत् यस्य । पक्षशून्ये उड्डयनशक्तिशून्ये च । पक्षः सहायः । तच्छून्ये ।

**अपक्षपात** पु० पक्षे सहायतायां पातः आनुकूल्यम् अभावार्थे न०त० । पक्षपाताभावे सहायताऽकरणे । "अपक्षपातात् वक्तव्यं सभायामिति निश्चय इति" नीति० ।

**अपक्षपातिन्** त्रि० पक्षे सहायतायां पतति पत-णिनि ७०त० ततः न०त० । पक्षपातिभिन्ने यथार्थवादिनि ।

**अपक्षेपण** न० अप-क्षिप-ल्युट् । अधःस्थानसंयोगहेतौ क्रियाविशेषे, अधःपातने च । अवक्षेपणमप्यत्रार्थे । "उत्क्षेपणं तथापक्षेपणमाकुञ्चनं तथा प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च चेति" भाषा० अवक्षेपणमिति वा पाठः ।

**अपगण्ड** पु० गण्डोदृढो वैपरीत्यार्थकेनापशब्देन प्रा०स० । अतिबाले अपोगण्ड इति हैम० । अपोगण्डशब्दे विवरणं दृश्यम् । [भावे घञ् । तत्रार्थे पु० ।

**अपगत** त्रि० अप+गम-कर्त्तरि क्त । अपयाते पलायिते च ।

**अपगम** पु० अप+गम-भावे घञ् न वृद्धिः । अपयाने अपसरणे । "निद्रापगमहेतुभ्यो विबोधश्चेतनागम" इति सा०द० "पुराणपत्रापगमादनन्तरं लतेव सन्नद्धमनोज्ञपल्लवेति" रघुः ।

**अपगर** पु० अप+निन्दार्थे गॄ-भावे अप् । निन्दने । "अन्यदन्तर्वेदीत्युपक्रम्य 'अभिगरापगरौ" कात्या० १३,३,३, "अपगरोनिन्देति" तद्व्या० ।

**अपगा** स्त्री अपगच्छति निम्नन्दते अप+गम-ड । आपगायाम् नद्याम् । अपयानकर्त्तरि त्रि० ।

**अपगा(गो)रम्** अव्य० अप+गुरी-उद्यमने णमुल् एच आच्च वा । उद्यम्येत्यर्थे "असिमपगारम् असिमपगोरं वेति" सि०कौ० ।

**अपगोह** पु० अप+गुह-घञ् । तिरोधाने गोपने च । "स विद्वानपगोहं कनीनामाविर्भवन्निति" ऋ० २,१५,७, "अपगोहं तिरोभावमिति" भाष्यम् ।

**अपघन** पु० अपहन्यते संहत्य कर्म्म कृत्वा वियुज्यते अप+हन-अप् घनादेशः । शरीरे, हस्ताद्यवयवे च । शरीरादि हि पुरुषोपभोगाय प्रथमं संहत्य तत्तत्कर्म्म निष्पाद्य भोगादृष्टक्षये पुनर्वियुज्यते इति तस्य तथात्वम् । देहादेः संहत्य